শ্রীঃ

শ্রীমতে নিগমান্তমহাদেশিকায নমঃ

শ্রীমান্ ৱেঙ্কটনাথার্যঃ কৱিতার্কিককেসরী।
ৱেদান্তাচার্যৱর্যো মে সন্নিধত্তাং সদা হৃদি॥

# শ্রী কৱিতার্কিকসিংহ সর্ৱতন্ত্রস্বতন্ত্র ৱেদান্তচার্য কৃতিষু
# ॥দ্রমিডোপনিষতসারঃ ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

শ্রী রঙ্গরামানুজ মহাদেশিকন্

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using Bengali for TEX.

শ্রীঃ
শ্রীমতে রামানুজায নমঃ

# ॥দ্রমিডোপনিষতসারঃ ॥

সেৱাযোগ্যোতিভোগ্যশ্শুভসুভগতনুসসর্ৱভোগ্যাতিশাযী
শ্রেযস্তদ্ধেতুদাতা প্রপদনসুলভোনিষ্টৱিধ্ৱংসশীলঃ।
ভক্তচ্ছন্দানুৱর্তী নিরুপধিকসুহৃতসতপদৱ্যাং সহাযঃ
শ্রীমান্ সর্ৱোচিতাযামুপনিষদি মিষত্যেষ গাধাশতৈর্নঃ॥ ১ ॥

আদ্যে পশ্যন্নুপাযং প্রভুমিহ পরমপ্রাপ্যভূতং দ্ৱিতীযে
কল্যাণোদারমূর্তের্দ্ৱিতযমিদমিতি প্রেক্ষমাণস্তৃতীযে।
ঐশ্ৱর্যাদেশ্চতুর্থে ৱিষমধুতুলযানন্যভোগ্যত্ৱমিচ্ছন
ষডভিসস্ৱাং পঞ্চমাদ্যৈরনিতরগতিতামাচচক্ষে মুনীন্দ্রঃ॥ ২ ॥

পরং নির্ৱৈষম্যং সুলভমপরাধপ্রসহনং
সুশীলং স্ৱারাধং সরসভজনং স্ৱার্জৱগুণম্।
সুসাত্ম্যস্ৱানন্দপ্রদমনঘৱিশ্রাণনপরং
মুকুন্দং নিধ্যাযান্মুনিরধিজগাৱাদ্যশতকে॥ ৩ ॥

দ্ৱিকাভ্যাং দ্ৱ্যষ্টাঙঘ্রির্দুরধিগমনীতিস্থপুটিতা
যদন্ত্যা মীমাংসা শ্রুতিশিখরতত্ত্ৱং ৱ্যৱৃণুত।
তদাদৌ গাথাভির্মুনিরধিকৱিংশাভিরিহ নঃ
কৃতী সারগ্রাহং ৱ্যতরদিহ সঙগৃহ্য কৃপযা॥ ৪ ॥

পরত্ৱাদ্যৈরিত্থং পরিচরণসক্তো গুণগণৈঃ
প্রভুং সেৱাযোগ্যং প্রথমশতকে ৱীক্ষ্য ৱরদম্।
তমেৱ স্ৱাত্যর্থপ্রিযমথ চ ভোক্তুং ৱ্যৱসিতো
ৱরেণ্যত্ৱং তস্য প্রথমৱরণীযং প্রথযতি॥ ৫ ॥

দ্ৱিতীযেতিক্লেশক্ষণৱিরহমুক্তুঙ্গললিতং
মিলতসর্ৱাস্ৱাদং ৱ্যসনশমনং স্ৱাপ্তিমুদিতম্।
স্ৱৱৈমুখ্যত্রস্তং স্ৱজনসুহৃদং মুক্তিরসদং
স্ৱকৈঙ্কর্যোদ্দেশ্যং সুভগসৱিধস্থং নিরৱিশত্॥ ৬ ॥

www.prapatti.com

উপাযত্বৈকান্তং প্রথমমিহ সেৱ্যত্বমুদিতং
ততশ্চ প্রাপ্যত্বৌপযিকমতিভোগ্যত্বমৱদত্।
দ্বযং ততস্বাসাধারণতনুৱিশিষ্টস্য গণযন
তৃতীযে ৱিশ্বেশং শুভসুভগরূপং কথযতি॥ ৭ ॥

অনীদৃক্সৌন্দর্যং তনুৱিহিতসর্গাদিসুভগং
স্বসেৱার্থাকারং প্রগুণৱপুষং মোহনতনুম্।
অপশ্যল্লভ্যার্চাৱিভৱমতিদাস্যাৱহতনুং
সদা দৃশ্যং স্তুত্যাকৃতিমঘৱিরুদ্ধাকৃতিমিহ॥ ৮ ॥

শ্রিযঃ কান্তোনন্তশশুভতনুৱিশিষ্টঃ ফলমসৌ
ফলাৱাপ্তের্হেতুঃ স্বযমিতি চ নির্দ্ধার্য শতকৈঃ।
ইদানীং বুদ্ধিস্থক্রমত ইহ যুক্ত্যা মুনিৱরঃ
ফলত্বং তস্যৈৱ দ্রঢযতি তদন্যেষু ৱিমুখঃ॥ ৯ ॥

স্থিরৈশ্বর্যং তুর্যে সহজবহুভোগ্যং নিরৱিশত
মিথঃশ্লিষ্টং ক্লেশাৱহসহিততুল্যং নিজজনম্।
কৃতার্থীকুর্ৱন্তং প্রণযিভিষজং সদ্বহুগুণং
স্বহেযস্বোপেক্ষ্যং স্বমতফলমুচ্চৈসস্বৱগতম্॥ ১০ ॥

উপাযত্বং যত্তৎপ্রথমশতকেভাৱ্যত ৱিভো-
রনন্যোপাযস্তদ্দৃঢযতি পরং পঞ্চমমুখৈঃ।
নিরীহস্তত্রাদৌ নিরৱধিকনির্হেতুকদযা-
সরিতস্রোতঃপদ্মং শরণযতি নাথস্য চরণম্॥ ১১ ॥

দযানিঘ্নং ভক্তৈরঘৱিমথনং প্রেমজনকং
জগদ্রক্ষাদীক্ষং স্মৃতিজুষমহম্ভাৱৱিষযম্।
শরণ্যং দীনানাং স্বরসকৃতদাস্যাভ্যুপগমং
প্রচখ্যৌ তং প্রাপ্তং প্রশকনকৃতং পঞ্চমশতে॥ ১২ ॥

অনাদ্যন্তানন্দস্বরসকরুণাকন্দজনিতঃ
প্রণেতুর্ৱ্যাপারঃ প্রপদনৱিপাকার্হ উদিতঃ।
তমাচার্যোপজ্ঞং চিরৱিরহিতস্বাত্মঘটন-
স্ফুরচ্ছক্তিং ষষ্ঠে মুনিরশরণো যাতি শরণম্॥ ১৩ ॥

গুরুদ্বারোপেযং স্বযমভিমতং ৰৈরঘটকং
চরিত্রৈঃ কর্ষন্তং পররিঘটনং স্বান্বিতহরম্।
নিদানং ধৃত্যাদের্ঘটকৰশভূতিদ্বযমগাত
অনর্হদ্বেঘট্যং ত্বৰিকলশরণ্যস্থিতিমিহ॥ ১৪ ॥

তদেৰং ষষ্ঠান্তং ৰিহিতসৰিশেষপ্রপদনঃ
ফলালাভাত্ খিন্নস্তৰরিতহৃদযসসপ্তমশতে।
অনিষ্টোপন্যাসপ্রভৃতিভিরনিষ্টপ্রশমনে
স্বতসসিধ্যচ্ছীলং প্রভুমভিমুখং সংমুখযতি॥ ১৫ ॥

সহন্ শাঠ্যাশঙ্কামুপশমিতগর্হঃ প্রকটযন
স্বগোপ্তৃত্বং গুপ্তিক্রমমখিলজন্তুপ্রণযিতাম্।
শ্রিতাক্রন্দচ্ছেত্তাস্মরণৰিশদশ্চিত্রৰিভৰঃ
স্তুতৌ যুঞ্জন্ স্তোত্রৰ্যসনজিদদর্শি প্রভুৰরঃ॥ ১৬ ॥

অথানিষ্টান্ পুংসাং স্বযমুপজিহীর্ষন্নপি ৰিভুঃ
তদিচ্ছাং বাহ্যেষু প্রশমযিতুকামঃ ক্রমৰশাত্।
নিজেচ্ছাসংসিদ্ধত্রিৰিধচিদচিদ্বস্তুৰিততিঃ
শ্রিতেচ্ছাৰৈচিত্রীৰশ ইতি ৰদত্যষ্টমশতে॥ ১৭ ॥

দিদৃক্ষাযাং দৃশ্যঃ প্রভুরগণি নিসসঙ্গসুলভঃ
স্বৰিশ্লেষৈকান্তঃ শ্রুতিৰিহিতপৌষ্কল্যৰিভৰঃ।
অপেক্ষাসাপেক্ষস্বৰিতরণসজ্জো হৃদি রতঃ
স্বদাস্যং তন্নিষ্ঠাং তদৰধিমপীহ প্রকটযন্॥ ১৮ ॥

অভীষ্টং ৰিশ্বস্মিন্ ৰিষমফলকাঙক্ষিণ্যৰিষমম
প্রযচ্ছন্তং দৃষ্টৰা পরমপুরুষার্থৈকরসিকঃ।
নিরস্তান্যাপেক্ষো নিখিলজগদীশস্য নৰমে
নিদানং সিদ্ধীনাং নিরুপধিসুহৃত্ত্বং গণযতি॥ ১৯ ॥

অভাৰ্যেকো বন্ধুশ্চিরকৃতদযশশীলজলধিঃ
স্বসংবন্ধাত্ গোপ্তা স্বগুণগরিমস্মারণপরঃ।
অশক্যো ৰিস্মর্তুং ঘটকমুখরিস্রম্ভৰিষযান
সুমজ্জানিসসিদধ্যুন্মুখসমষ ইচ্ছন্নৰসরম্॥ ২০ ॥

উদন্তৈরিত্যেৱং নিরুপধিকসৌহার্দপিশুনৈঃ
    উদন্যামুদ্বেলামুপজনিতৱন্তং নিজপদে।
ত্রিৱর্গাতিক্রান্তস্থিরনগরঘণ্টাপথগতেঃ
    সহাযীকুর্ৱাণশ্চরমশতকে ৱিন্দতি মুনিঃ॥ ২১ ॥

গতিং ৱ্যধৱক্লেশচ্ছিদমপদ শঙ্কাস্পদরসং
    ভজদ্ভিসসুপ্রাপং ৱিৱিধভজনপ্রক্রিযমিহ।
ফলে তীৱ্রোদ্যোগং স্বৱিষযকৃতাত্যাদরমগা-
    দ্যদৃচ্ছাতুষ্টং সতসরণিমপুনর্জন্মসযুজম্॥ ২২ ॥

পরং প্রাপ্যং পশ্যন্ পরিচরণহেতুং ৱিগণযন
    পরিষ্কুর্ৱন্নাজ্ঞামনিতরশরণ্যশ্শরণযন্।
অনিষ্টপ্রধ্ৱংসপ্রভৃতিষু নিদানং চ কথযন
    মুহুর্দেৱং লক্ষ্ম্যা সহিতমিহ ভেজে মুনিৱরঃ॥ ২৩ ॥

পুরা শোকশ্লোকোভৱদিতি নযাদিত্যুপনিষত
    মুনেঃ পুণ্যশ্লোকাদজনি ৱরভক্তেঃ পরিণতিঃ।
ৱ্যপোহ্য স্বং ভাৱং হরিচরণসন্তানকলিকাং
    অপীক্ষদ্যোগী যস্তনুমতনুকারুণ্যৱিৱশঃ॥ ২৪ ॥

সতামিত্থং সারং দ্রমিডনিগমস্যান্বকথযত
    বহূনাং ৱিদ্যানাং বহুমতিপদং ৱেঙ্কটপতিঃ।
দিশাসৌধশ্রেণীদৃঢঘটিতজৈত্রধ্ৱজপটী
    পরামর্শভ্রশ্যতপ্রতিমতনিরাবাধনিগমঃ॥ ২৫ ॥

মনুৱ্যাসপ্রাচেতসপরিষদর্হা ক্কচিদিযং
    সুধাসিক্তা সূক্তিঃ স্বযমুদযমন্বিচ্ছতি জনে।
নিরুন্ধ্যুঃ কে ৱিন্ধ্যাচলৱিকটসন্ধ্যানটজটা-
    পরিভ্রান্তা পঙ্গোরুপরি যদি গঙ্গা নিপততি॥ ২৬ ॥

॥ ইতি দ্রমিডোপনিষতসারঃ সমাপ্তঃ ॥

www.prapatti.com